**पीएम-कर्तव्य भवन**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदेहल्याः कर्तव्यपथस्य कर्तव्यभवनं-3 इत्यस्य उद्घाटनं विधास्यते। अस्मिन् अवसरे सः सार्वजनिककार्यक्रमम् अपि सम्बोधयिष्यति। कर्तव्यभवनम्-3, सेण्ट्रल् विस्टा इत्यस्य विस्तृतपरिवर्तनस्य भागः अस्ति। प्राशासनिकप्रक्रियां सुव्यवस्थितं कर्तुं, लशासनं समर्थयितुं च उद्युक्तेषु कतिपयेषु आगामिषु सामान्य-केन्द्रीय-सचिवालय-भवनेषु एतत् प्रथमं अस्ति। कर्तव्यभवन्-3 इति आधुनिककार्यालयसङ्कुलः प्रायः सार्धैक लक्षवर्गमीटर् परिमितं भविष्यति, यस्य विस्तारः द्वयोः आधारयोः सप्तस्तरेषु च भविष्यति। अत्र गृहं, विदेशकार्यं, ग्रामीणाभिवृद्धिः, पेट्रोलियमं अद्य प्राकृतिकवायुः इत्यादीनि प्रमुखाः मन्त्रालयाः, प्रधान-वैज्ञानिक-परामर्शकादयश्च च भविष्यन्ति।

**अश्विनी-नवान्वेषण-उद्यानः**

रेलमंत्रिणाा अवश्विनीवैष्णवेन कर्णाटकस्य बेङ्गळूरु-नगरस्य देवनहल्ली-नगरे इन्नोवेशन्-पार्क् इत्यस्य उद्घाटनसमारोहे गतिशक्ति-विश्वविद्यालयः तथा एस्. ए. पि. ल्याब्स्-इण्डिया-इन्नोवेशन्-पार्क् इत्येताभ्यां एम्. ओ. यू. इत्येतयोः हस्ताक्षरं कृतम्। ह्यः अस्मिन् कार्यक्रमे मुख्यप्रभाषणं कुर्वन् इलेक्ट्रानिक्स् अद्य सूचनाप्रौद्योगिकीमन्त्री अश्विनी वैष्णवः अवदत् यत् एस्. ए. पी. ल्याब्स् इण्डिया इन्नोवेशन् पार्क् इति भारतीयविकासगाथायां समयोचितं निवेशम् अस्ति इति।

**सेना युद्धविराम**

नियन्त्रणरेखायां युद्धविरामस्य उल्लङ्घं न अभवत् इति भारतीयसेनया स्पष्टी कृतम्। पून्छक्षेत्रे-प्रदेशे उल्लंघनता विषये प्रसारमाध्यमानां प्रतिवेदनायाः अनन्तरं एतत् स्पष्टीकरणम् अभवत्

**सहकारिता-सभाः**

केन्द्रीय-सहकारिता-मन्त्री अमितशाहः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे सहकारिता-मन्त्रालयः सहकारिता-संस्थानां जीवन्त-सफल-व्यापार-एककेषु परिवर्तनाय प्रतिबद्धः अस्ति इति। सः अवदत् यत्, देशे पञ्चवर्षेषु द्विलक्षं बहुउद्देशीय-सहकार-संस्थानां स्थापनायाः महत्त्वाकांक्षायाः लक्ष्यस्य दृष्ट्या, अद्यावधि पञ्चत्रिंशत्सहस्राधिकाः नूतन-सहकार-संस्थाः निर्मिताः सन्ति। नवदेहली-नगरे सहकार-क्षेत्रस्य सुदृढीकरणस्य उपक्रमाणां विषये स्वमन्त्रालयस्य परामर्शीसमित्याः द्वितीयसभायाः अध्यक्षतां कुर्वन् सः एतदुक्तवान्।

**भारत-फिलिपीन्स् एम् ओ युः**

भारत-फिलिपीन्स्-देशौ द्वैपाक्षिकसहयोगं सामरिकसहभागित्वस्तरपर्यन्तम् उन्नतीकर्तुं सहमतौ स्तः। अद्य नवदेहली-नगरे प्रधानमन्त्रिणा नरेन्द्रमोदिना सह फिलिपीन्स्-देशस्य राष्ट्रपतिना फर्डिनांड् आर् मार्कोस् जूनियर् इत्यनेन सह द्वैपाक्षिक-वार्तायां अयं निर्णयः कृतः।

**राष्ट्रपतिः द्रौपदी इण्डिया-फिलिपीन्स्ः**

राष्ट्रपतिः द्रौपदी मुर्मुः अवदत् यत् भारत-फिलिपीन्स्-सहभागित्वम् न केवलं उभयदेशानां जनानां कृते लाभप्रदम् अस्ति अपितु अस्मिन् क्षेत्रे शान्तेः, स्थिरतायाः, समृद्धेः च आधारः अस्ति इति। फिलिपीन्स्-देशस्य राष्ट्रपतिः फर्डिनांड् रोमुल्डेज् मार्कोस् जूनियर्-वर्यस्य प्रथम-भारत-राज्ययात्रायाः स्वागतम् कुर्वन् राष्ट्रपतिः मुर्मु-वर्यः अवदत् यत् द्वयोः देशयोः मध्ये विस्तृत-सहकारः निरन्तर-उच्च-स्तरीय-सम्बन्धं, समृद्ध-व्यापार-वाणिज्यम्, दृढ-रक्षा-सुरक्षा-सहकारं, समुद्रीय-क्षेत्रे तथा विकास-सहभागितायां च अन्तर्भवति इति।

**मणिपुर**

मणिपुर-राज्ये राष्ट्रपतिशासनं षण्मासपर्यन्तं विस्तारयितुं संसदः अनुमोदनम् अकरोत्।

**रुस्-देशः**

रुस्-देशः तैल-आयातविषये भारतस्य समर्थनं कुर्वन् अवदत् यत् सार्वभौमराष्ट्राणां स्वतन्त्ररूपेण व्यापारसहभागिनां चयनस्य अधिकारः अस्तीति।

**उत्तराखण्ड्-राज्यस्य**

उत्तराखण्ड्-राज्यस्य उत्तरकाशी-मण्डले हर्षिल्-क्षेत्रस्य धराली-ग्रामे ह्यः अपराह्णे मेघस्फोटात् खीर्गङ्गानद्याः आकस्मिकजलप्लावनेन व्यापकं विनाशम् अभवत्। मण्डल-आपत्कालीन-परिचालन-केन्द्रानुसारं, धराली-विपणि-क्षेत्रे महता जलप्रहारेण भवनानां, यात्रि-

स्थानानां, आपणानां च महती क्षतिः अभवत्। सेना, राष्ट्रिय-विपद्-प्रतिक्रिया-बलम्, राज्य-विपद्-प्रतिक्रिया-बलम्, मण्डल-प्रशासनं, अन्ये च सम्बद्ध-दलानि च साहाय्योद्धार-कार्येषु सक्रियतया संलग्नानि सन्ति। मण्डल-दंडाधिकारिणः प्रशान्त-आर्यः अवदत् यत् प्रारम्भिकसूचनानां आधारेण । न्यूनातिन्यूनं चत्वारः जनाः मृताः, अनेके जनाः लुप्ताः च इति कथ्यते। राज्यस्य विपद्-व्यवस्थापनस्य सचिवः विनोदकुमारः आकाशवाण्या सह विशेषतया वार्तालापं कुर्वन् अवदत् यत्, प्रशासनं पूर्णतया जागरूकम् अस्ति, प्रभावितनागरिकाणां कृते सर्वान् सम्भवान् साहाय्यान् च प्रददाति। राष्ट्रपतिः द्रौपदी मुर्मू इत्येषा मेघस्फोटस्य दुःखदघटनायां पीडितानां परिवारान् प्रति शोकं प्रकटितवती। प्रधानमन्त्रिणा नरेन्द्रमोदिना, गृहमन्त्रिणा अमितशाहेन च घटनायाः विषये उत्तराखण्डस्य मुख्यमन्त्रिणा सह वार्तालापं कृत्वा परिस्थितिः समीक्षिता।

**चेस्-चेन्-नान्-अहि-मास्टर्स्ः**

चेस्-क्रीडायां चेन्नाल्-ग्राण्ड्-मास्टर्स्-प्रतियोगितायाः तृतीयः संस्करणः अद्य चेन्नै-नगरे आरभ्यते। प्रतियोगितायां द्वै चक्रे-राबिन्-समूहौ स्तः, ये विभागद्वये विभक्तौ स्तः-द-मास्टर्स्, द-चालेञ्जर्स् च।

**।। इति वार्ता:।।**